# दिवाकरद्युतिः



वेदमार्तण्डाचार्यदिवाकरमहापात्राभिनन्दनग्रन्थः

Scanned with CamScanner

दिवाकरद्युतिः

(वेदमार्तण्ड-आचार्यदिवाकरमहापात्राभिनन्दनग्रन्थः)

प्रकाशिका –
अर्वाचीनसंस्कृतसाहित्यपरिषद्
सी ६२, अक्षरधाम टेनामेन्ट्स,
मथुरानगरी समीप, अक्षरचोक्,
वडोदरा, गुजरात. 390020
२०१६

ISBN :978-93-827 13-15-9

प्रतिलिपय: - ३००
प्रकाशनवर्षम् – २०१६
मूल्यम् – ५००
प्राप्तिस्थानम् – वेदनिकेतनम्, लुहागडजागा, शंकरानन्दमथलेन्
तिआडिसाहि, पुरी- ७५२००१ , ओडिशा
दूरभाषा- ०९४३७६९७५३०

मुद्रणम् – Pagemaker Computer Services
117, Bapuji Nagar, Bhubaneswar - 751009



Scanned with CamScanner

## काव्यलक्षणविमर्शः

**प्रो. अर्चना दुबे**

काव्यं लोकोत्तरवर्णनानिपुणं कविकर्म वर्तते। अग्निपुराणे सर्वप्रथमं काव्यलक्षणं निर्दिश्य

संक्षेपाद् वाक्यमिष्टार्थव्यवच्छिन्ना पदावली।
काव्यं स्फुरदलंकारं गुणवद् दोषवर्जितम्॥[1]

अत्र काव्यस्य पञ्च तत्त्वानि स्वीक्रियते – इष्टार्थः . संक्षिप्तवाक्यम् , अलङ्काराः , गु दोषाश्चेति। काव्यलक्षणविषये संस्कृतज्ञानां नैकमत्यम्। तैत्तिरीयोपनिषदि **'रसो वै सः'**[2] ब्रह्मरसरुपेण प्रतिपाद्यते। भरतेनाप्युच्यते **'न हि रसाद् ऋते कश्चिदर्थः प्रवर्तते।'** विचार्यते चेत् तर्हि ज्ञायते यद् विश्वनाथेन पूर्वाचार्यैः अङ्गीकृतं काव्यस्य रसात्मकत्वं प्रतिपादितम्। ध्वनिकारैः प्रतिपादितो रसध्वनिरेव काव्यत्वेन स्वीक्रियते। कुन्तकाच **'वक्रोक्तिः काव्यजीवितम्'** इति साधयति। औचित्यं रससिद्धस्य स्थिरं काव जीवितम्[3] क्षेमेन्द्रः **'औचित्यं काव्यजीवितम्'** इति साधयति। जगन्न रमणीयार्थप्रतिपादकं शब्दमेव काव्यं मनुते , न चार्थम्। काव्यशास्त्रे आचार्यमम्म काव्यलक्षणं वाङ्गत्वेन स्वीक्रियते। मानवः चेतनासम्पन्नः संवेदनशीलप्राणी च अस्ति। मनः शरीरामाधृत्य , दुःखेन , सुखेन , प्रेम्णा , दयया , क्रोधेन , आशया च चलायमानं भ तथा – प्रकृत्या प्रतिक्षणं परिवर्तनेन सौम्यं , मनोरमं विविधरुपैश्च भावं गृह्णाति। क मानवस्य भावात्मक विकासो भवति। काव्यमस्माकं भावानाम् उत्सर्जनमस्ति।

**"काव्यं" शब्दस्य व्युत्पत्तिः -** काव्यमिति शब्दोऽयं कवि शब्दे क्रमधातोः औनादिके प्रत्यय कृते बाहुलकात् मकारस्य वकारादेशे रेफस्य लोपे सति कविरिति शब्दः निष्पद्यते **कवेरिदं कर्म भावो वा काव्यम्"॥**

**साहित्यदर्पणानुसारेण काव्यलक्षणम् -**

"काव्यं परिभाषयन् विश्वनाथकविराजः स्वकीये ग्रन्थे साहित्यदर्पणे वक्ति - **"वाक्यं रसा काव्यम्"**[4] अर्थात् रस एव काव्यस्य आत्मा अस्ति। रसेन विना काव्यस्य काव्यत्वं

---

[1] अग्निपुराणम् ३३६.६०६

[2] तै.२.६

[3] औ.४.५

[4] साहित्यदर्पणः प्रथम – परिच्छेदः(१/३)



Scanned with CamScanner

सिद्ध्यति। रसाभावे ऽ शब्दार्थमयं वाक्यं केवलं वाक्यमात्रमेव भवति, किन्तु यदा वाक्यं रसात्मकं भवति तदा अत्र काव्यत्वं तु भवत्येव ॥ " **रसात्मकम्** " इत्येव अभिप्रायोऽस्ति यत् "

**स एव आत्मा साररूपतया जीवनधायको यस्य** " ।

**मम्मटानुसारेण काव्यलक्षणम्-**

रसानुभूत्यां बाधकेभ्यः च्युतसंस्कारादिप्रबलदोषेभ्यः रहितं काव्यम् ।

**शब्दार्थौ** - शब्दार्थयुगलं वा शब्दार्थयोः समष्टिः काव्यम् ।

**सगुणौ** - ओजप्रसादादिगुणयुक्तं शब्दार्थयुगलं काव्यम् ।

**अनलङ्कृती पुनः क्वापि** - सर्वत्र अलङ्कारसहितं किन्तु यदा कदा अलङ्काररहितमपि काव्यं भवति, यदि रसपरिपाकः समुचितः अस्ति। यथा -

**यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा -**
**स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः ।**
**सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ**
**रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते ॥**[5]

अत्र स्फुटो न कश्चिदलंकारः। अत एव काव्यमस्ति ।

**रसगंगाधरानुसारेण काव्यलक्षणम्** - आचार्य जगन्नाथेन रसगंगाधरस्य प्रथमानने उक्तं -

" **रमणीयार्थप्रतिपादकः शब्दः काव्यम्** " ॥१॥[6]

अर्थात् यः शब्दः रमणीयार्थस्य प्रतिपादकोऽस्ति स एव शब्दः काव्यं भवति ।

**रमणीयता** - अस्मिन् काव्यलक्षणे रमणीयता इत्यस्य पदस्य प्रयोजनमिदमस्ति यत् कदाचिद् अरमणीयशब्देषु काव्यत्वस्य आपत्तिः न अभवत् ।

**शब्दः** - **"शब्दः"** इत्यस्य पदस्य प्रयोजनं इदम् अस्ति यत् यदि केवलं रमणीयार्थस्य प्रतिपादकः यः शब्दः भवति स एव काव्यं भवति तर्हि अनुरागाद्यर्थस्य व्यञ्जके कटाक्षनिक्षेपाद्यर्थे अतिव्याप्तिं वारयितुं शब्दः पदस्य प्रयोगः कृतः ।

**प्रतिपादकः** - रमणीयार्थनिरूपितस्य वाचकत्वस्य निवेशे तादृशार्थव्यञ्जके व्यञ्जकत्वस्य निवेशे च तथाविद्यार्थवाचके शब्दे अतिव्याप्तिं वारणाय प्रतिपादकत्वस्य प्रवेशः ।

**अर्थः** - व्याकरणस्य शब्दः अपि रमणीयो भवति तत्र काव्यस्य आपत्तिनिवारणाय अर्थशब्दस्य प्रयोगः अभवत् । एवम् इदम् काव्यलक्षणम् सर्वथा निर्दुष्टम् अस्ति ।

---

[5] काव्यप्रकाशः १/४

[6] रसगङ्गाधरः (पृ. ४)



Scanned with CamScanner

**काव्यदर्शानुसारेण काव्यलक्षणम्** - दण्डी काव्यदर्शस्य प्रथमपरिच्छेदे काव्यस्य स्वरूपं वर्णनं करोति - " **शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली** ।[7] अर्थात् काव्यस्य शरीरं तु काव्ये प्रयुक्ता अभिलषिताः सरसतया रमणीयतायाः च वर्णयितुमुद्दिष्टाः ये अर्थाः कविप्रतिभाप्रतिफलिताः सुन्दराः पदार्थाः तैः समन्विताः पदसमूहाः विद्यन्ते । एवम् अभीष्टार्थयुक्तः हृद्यार्थविभूषित वा पदसमुदायः काव्यं काव्यशरीरम् अस्ति ।

**काव्यमीमांसानुसारेण काव्यलक्षणम् -**

**" चत्वारि शृङ्गा त्रयोऽस्य पादा द्वे शीर्षे सप्तहस्तासोऽप्य त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्यान् □ विवेश ॥" शब्दार्थौ ते शरीरं, संस्कृतं मुखं, प्राकृतं बाहू, जघनमपभ्रंशः, पैशाचं पादौ, उरो मिश्रम् । समः प्रसन्नो मधुर, उदार , ओजस्वी चाऽसि । उक्तिचणं ते वचः , रसः □त्मा, रोमाणि छन्दांसि, प्रश्नोत्तरप्रवाह्लिकादिकं च वाक्केलि, अनुप्रासोपमादयश्च त्वामलङ्कुर्वन्ति ।**[8] अर्थात् हे आयुष्मन् शब्दार्थौ तव कलेवरम्, संस्कृतभाषा तव आननमस्ति, प्राकृतभाषा ते बाहू स्तः । अपभ्रंशभाषाः चरणौ स्तः मिश्रभाषा वक्षःस्थलमस्ति । इत्थं संस्कृतमारभ्य मिश्रपर्यन्तं भाषाः काव्यपुरुषस्य तव अङ्गप्रत्यङ्गानि सन्ति ।

शब्दार्थौ सहितौ काव्यं गद्यं पद्यं च तद् द्विधा [ भामहः १,१६]

काव्यशब्दोऽयं गुणालङ्कारसस्कृतयोः शब्दार्थयोर्वर्तते । [ वामनः१,१]

अदोषौ सगुणौ सालङ्कारौ च शब्दार्थौ काव्यम् [ हेमचन्द्रः पृ. १६]

शब्दार्थौ निर्दोषौ सगुणौ प्रायः सालङ्कारौ च काव्यम् [ वाग्भटः पृ. १४]

गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ [ विद्यानाथः प्रतापरूद्रीयम् पृ. ४२]

शब्दार्थौ वपुरस्य तत्र विवुधैरात्माभ्यधायि ध्वनिः [ विद्याधरः एकावली पृ. १,१३]

**"अतः प्रजानाम् व्युत्पत्तिमभिसन्धनाय सूरयः ।**
**वाचां विचित्रमार्गाणां निबन्धुः क्रियाविधिम् ॥**
**तैः शरीरं काव्यानामलङ्काराश्चः दर्शिताः । '** [काब्यादर्शः -१-९]
**'शरीरं तावदिष्टार्थ – व्यवछिछन्ना पदावली ॥'** [काव्यादर्शः-१-१०]

काव्यस्यात्मा ध्वनिरिति बुधैः यः समाम्नातपूर्व
स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये ।

---

[7] काव्यादर्शः प्रथमपरिच्छेदः १.

[8] काव्यमीमांसा पृष्ठ सं. – १३-१४



Scanned with CamScanner

केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयं
तेन ब्रूमः सहृदयमनः प्रीतये तत्स्वरूपम् [ ध्वन्यालोकः १,१]
शब्दार्थौ सहितौ वक्रकवि व्यापारशालिनि ।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि ॥[ वक्रोक्तिजीवितम् १-७]
शब्दार्थौ सहितावेव प्रतीतौ स्फुरतः सदा ।
सहिताविति तावेव किमपूर्वं विधीयते ॥
साहित्यमनयोः शोभाशालितां प्रति काप्यसौ ।
अन्यूनानतिरिक्तत्व मनोहारिण्यवस्थितिः ॥[ वक्रोक्तिजीवितम् १-१६,१७]
काव्यस्यालङ्कारैः किं मिथ्यागणितैर्गुणैः ।
यस्य जीवितमौचित्यं विचिन्त्यापि न दृश्यते ।
अलङ्कारास्त्वलङ्कारा गुणा एव गुणाः सदा ।
औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम् । [औचित्यविचारचर्चा ४-५]

किं तावत् काव्यमिति विचारचर्चायाम् अनेकानि काव्यलक्षणानि दृष्टिपथम् अवतरन्ति । भरतस्य नाट्यशास्त्रे प्राचीनतमं लक्षणम् उपलभ्यते । मुख्यतो दृश्यकाव्यमेव परिभाष्यते । पण्डितराजं जगन्नाथं विहाय प्रायः सर्वैरपि पूर्वाचार्यैः काव्यलक्षणे शब्दार्थयोः द्वयोरपि संकलनं विधीयते । काव्यशास्त्रे मुख्यत्वेन आचार्यमम्मटस्य लक्षणं स्वीक्रियते ॥

साहित्यविभागः
श्रीसोमनाथसंस्कृतविश्वविद्यालयः

Scanned with CamScanner